गणेशब्रह्मविष्णुभ्यो हराय परमेश्वरि ! ॥
जीवात्मने क्रमेणैव तथैव परमात्मने ।
षट्शतानि सहस्राणि सहस्रञ्च तदेव हि ।
पुनः सहस्रं गुरवे क्रमेण च निवेदयेत् ”*॥
एवं यथास्थानावस्थितेभ्यो गणेशादिभ्यस्तज्जपसमर्पणमुक्ता तत्तत्स्थानानां तत्तदवस्थितमातृकार्णानाञ्च रूपमाह तत्रैव ।
“आधारे स्वर्णवर्णेऽस्मिन् वादिसान्तानि संस्मरेत् ।
द्रुतजीववर्णवर्णानि वर्णानि परमेश्वरि ! ॥
स्वाधिष्ठाने विद्रुमाभे वादिलान्तानि च स्मरेत् ।
विद्युत्पुञ्जप्रभाभानि सुनीले मणिपूरके ॥
डफान्तानि महानीलप्रभाणि च विचिन्तयेत् ।
पिङ्गवर्णे महावह्निकलिकाभानि चिन्तयेत् ॥
कादिठान्तानि वर्णानि चतुर्थेऽनाहते प्रिये ।
विशुद्धौ धूम्रवर्णे च रक्तवर्णान् स्वरान् यजेत् ॥
आज्ञायां विद्युदाभायां शुभ्रौ हक्षौ विचिन्तयेत् ॥
कर्पूरद्युतिसंराजत्सहस्रदलनीरजे ।
नादात्मकं ब्रह्मरन्ध्रं जानीहि परमेश्वरि ।
एतेषु सप्तचक्रेषु स्थितेभ्यः परमेश्वरि ! ॥
जपं निवेदयित्वा तं अहोरात्रभवं प्रिये ।
सहजं परमेशानि न्यासं कुर्य्याद्विचक्षणः ॥
ऋषिर्हंसोऽव्यक्तरूपगायत्री च्छन्द उच्यते ।
देवता परमादिस्तु हंसोऽहं बीजमुच्यते ॥
सः शक्तिः कीलकं सोऽहं प्राणवस्तु त्वमेव हि ।
नैवस्थलं भवेत् श्वेतं वर्णञ्च परमेश्वरि ! ॥
तदा तत्त्वञ्च इत्येवं मनोरस्य प्रकीर्त्तितः ।
मोक्षार्थे विनियोगः स्यादेवं जानीहि पार्व्वति ॥
ततः षडङ्गविन्यासं कुर्य्याद्देहस्य सिद्धये ।
सूर्य्यं सोमं महेशानि निरञ्जनमतः परम् ॥
निराभासं चतुर्थ्यन्तं स्वाहान्ते क्रमतो न्यसेत् ।
अवचान्तं प्रविन्यस्य ततोऽनन्तपदं स्मरेत् ॥”
इति च तत्रैव ७ पटलः ॥*॥
अजपाया द्वैविध्यमुक्तं यथा,—
“हंसेति प्रकृतिर्ज्ञेया ओँकारः प्रकृतेर्गुणः ।
हंकारेण बहिर्य्याति सकारेण विशेत् पुनः ॥
हंसेति परमं मन्त्रं जीवो जपति सर्व्वदा ।
षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः ॥
अजपा नाम गायत्री योगिनां मोक्षदायिनी ।
अजपा द्विविधा देवि ! व्यक्ता गुप्ता क्रमेण च ।
व्यक्ता च द्विविधा प्रोक्ता शब्दज्योतिःस्वरूपिणी ।
ज्योतीरूपा च सा देवी हृदिस्थाने प्रतिष्ठिता ।
ठकाररूपा गुप्ता च शिवशक्तिः प्रकीर्त्तिता ।
चन्द्रबीजं ठकारस्तु बोधितः स्वर उच्यते ॥
अजपार्थमयी गुप्ता वह्निजाया प्रकीर्त्तिता ।
अस्याः सहस्रमात्रेण पुरश्चरणमुच्यते ॥”
इति निरुत्तरतन्त्रे ४ पटलः ॥
(जरासन्धनृपतेः सेनापतिविशेषः । यथा, महाभारते । २ । २२ । ३१—३२ ।
“स तु सेनापतिं राजा सस्मार भरतर्षभ ! ।
कौशिकं चित्रसेनञ्च तस्मिन् युद्ध उपस्थिते ॥
ययोस्ते नामनी राजन् ! हंसेति डिम्भकेति च ।
पूर्व्वं संकथिते पुंभिर्नृलोके लोकसत्कृते ।”*॥
मेरोरुत्तरस्थपर्व्वतविशेषः । यथा, विष्णुपुराणे । २ । २ । २८ ।
“शङ्खकूटोऽथ ऋषभो हंसो नागस्तथा परः ।
कालञ्जराद्याश्च तथा उत्तरे केशराचलाः ॥”)

**हंसकः**, पुं, ( हंस इव कायति मधुरध्वनित्वात् । कै शब्दे + कः । ) पादकटकः । यथा,—
“पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ।
हंसकः पादकटकः किङ्किणी क्षुद्रघण्टिका ॥”
इत्यमरः । २ । ६ । १०८ ॥
“षट् नूपुरे । केचित्तु पादाङ्गदादिचतुष्कं चरणभूषणे नूपुर इति ख्याते । हंसकादिद्वयं रवशून्ये हंसाकृतिचरणभूषणे इत्याहुः । हंस इव कायति मधुरध्वनित्वात् हंसकः । कै शब्दे डः । हंसाकृतित्वात् हंस इव हंसकः इति वा । इवार्थेविकारसंघ इत्यादिना कः ।” इति भरतः ॥ (हंस इवेति । इवे प्रतिकृताविति कन् । स्वार्थे कन् वा ) राजहंसः । इति शब्दचन्द्रिका ॥ ( यथा, माघे । ७ । २३ ।
“सरित इव सविभ्रमप्रयात-
प्रणदितहंसकभूषणा विरेजुः ॥”
तालप्रभेदः । यथा,—
“लघुर्गुरुर्लघुर्यत्र स तालो हंसकः स्मृतः ॥”
इति सङ्गीतदामोदरः ॥

**हंसकीलकः**, पुं, ( हंस इव कीलतीति । कील बन्धने + ण्वुल् । ) रतिबन्धविशेषः । यथा,—
“नारीपादद्वयं कृत्वा कान्तस्योरुयुगोपरि ।
कटिमान्दोलयेद् यत्नात् बन्धोऽयं हंसकीलकः ॥”
इति स्मरदीपिका ॥

**हंसकूटः**, पुं, ककुत् । इति केचित् ॥ ( पर्व्वतविशेषः । यथा, महाभारते । १ । ११९ । ४९ ।
“इन्द्रद्युम्नः सरः प्राप्य हंसकूटमतीत्य च ।
शतशृङ्गे महाराज तापसः समतप्यत ॥” )

**हंसगद्गदा**, स्त्री, ( हंस इव गद्गदो यस्याः । ) मधुरभाषिणी । तत्पर्य्यायः । मधुरनिस्वना २ । इति त्रिकाण्डशेषः ॥

**हंसगामिनी**, स्त्री, (हंस इव गच्छतीति । गम + णिनिः । ङीप् । हंसगमनमिव गमनं यस्याः सा इति वा । ) नारीविशेषः । ( हंसेन गच्छतीति । ) ब्रह्माणी । इति हंसारूढाशब्ददर्शनात् ॥

**हंसदाहनं**, क्ली, ( हंसं श्रेष्ठं सुरभित्वात् दाहनं यस्य । ) अगुरु । इति शब्दचन्द्रिका ॥ (गुणादयोऽस्या अगुरुशब्दे ज्ञातव्याः ॥ )

**हंसनादिनी**, स्त्री, ( हंस इव नदतीति । नद + णिनिः । ङीप् । नारीविशेषः । तस्या लक्षणं यथा, शब्दमालायाम् ।
“गजेन्द्रगमना तन्वी कोकिलानां रुतान्विता ।
नितम्बगुर्व्विणी या सा कथ्यते हंसनादिनी ॥”

**हंसपदी**, स्त्री, ( हंसस्येव पादा मूलान्यस्याः । ङीप् । पादस्य पद्भावः । ) गोधापदी । इति राजनिर्घण्टः ॥ हंसपदीविशेषः । तत्पर्य्यायः । मधुस्रवा २ हंसपादी ३ त्रिपदी ४ । इति रत्नमाला ॥ ( अस्याः पर्य्यायो यथा,—
“हंसपादी हंसपदी कीटमाता त्रिपादिका ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

**हंसपादं**, क्ली, ( हंसस्य पाद इव वर्णो यस्य । ) हिङ्गुलम् । इति हलायुधः ॥ ( पुं, यथा,—
हिङ्गुलन्दरदं म्लेच्छमिङ्गुलञ्चूर्णपारदम् ।
दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः ॥
हंसपादस्तृतीयः स्यात् गुणवानुत्तरोत्तरम् ।
चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः ।
जवाकुसुमसङ्काशो हंसपादो महोत्तमः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
हंसचरणे च पुं ॥

**हंसपादिका**, स्त्री, (हंसपादी एव स्वार्थे कन् । टाप् । ) हंसपदी । इति राजनिर्घण्टः ॥

**हंसपादी**, स्त्री, (हंसस्य पादा इव मूलान्यस्याः । ङीप् । ) हंसपदीविशेषः । इति रत्नमाला ॥ (अस्याः पर्य्यायो गुणाश्च यथा,—
“हंसपादी हंसपदी कीटमाता त्रिपादिका ।
हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान् ॥
विसर्पदाहातिसारलूताभूताग्निरोहिणीः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

**हंसबीजं**, क्ली, ( हंसस्य बीजम् । ) हंसडिम्बः । तस्य गुणा यथा, राजनिर्घण्टे ।
“हंसबीजं परं बल्यं हृद्यं वातनाशनम् ।
पाके लघुतरं प्रोक्तं सर्व्वामयविनाशनम् ॥”

**हंसमाला**, स्त्री, ( हंसस्य माला । ) कादम्बः । इति शब्दचन्द्रिका ॥ हंससमूहः । यथा,—
“तां हंसमालाः शरदीव गङ्गां
महौषधीर्नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले
प्रपेदिरे प्राक्तनजन्मविद्याः ॥”
इति कुमारसम्भवे । १ । ३० ॥

**हंसमाषा**, स्त्री, हंसः श्रेष्ठो माषो यस्याः । ) माषपर्णी । इति राजनिर्घण्टः ॥

**हंसरथः**, पुं, ( हंसो रथो वाहनं यस्य । ) ब्रह्मा । इति त्रिकाण्डशेषः ॥

**हंसलोमशं**, क्ली, ( हंस इव लोमशम् । ) कासीसम् । इति राजनिर्घण्टः ॥

**हंसलोहकं**, क्ली, ( हंसं श्रेष्ठं लोहमिव । कन् ।) पित्तलम् । इति हेमचन्द्रः ॥ ( विवरणमस्य पित्तलशब्दे ज्ञातव्यम् ॥ )

**हंसवती**, स्त्री, ( हंस इव हंसपदाकार इव मूलमस्त्यस्याः इति । हंस + मतुप् । ङीप् । मस्य वः । ) हंसपदीलता । इति जटाधरः ॥
हंसयुक्ते, त्रि ॥

**हंसवाहनः**, पुं, ( हंसो वाहनं यस्य । ) ब्रह्मा । इति काश्चिदमरः । १ । १ । १७ ॥ ( यथा, श्रीमद्भागवते । ७ । ३ । १६ ।